# Shri Chandrashekharendrasarasvati Sahasranamavali

# શ્રીચન્દ્રશેખરેન્દ્રસરસ્વતી સહસ્રનામાવલિઃ

## Document Information

Text title : chandrashekharendrasarasvatI sahasranAmAvalI

File name : chandrashekharendrasahasranAmAvaliH.itx

Category : deities_misc, gurudev, sahasranAmAvalI, nAmAvalI

Location : doc_deities_misc

Proofread by : Aruna Narayanan

Latest update : November 20, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 28, 2023

*sanskritdocuments.org*

# શ્રીચન્દ્રશેખરેન્દ્રસરસ્વતી સહસ્રનામાવલિઃ

શ્રીગુરુભ્યો નમઃ ।
શ્રીકાઞ્ચીકામકોટિપીઠાધીશ્વરજગદ્ગુરુ શ્રીશઙ્કરાચાર્ય
પરમપૂજ્ય શ્રીચન્દ્રશેખરેન્દ્રસરસ્વતીશ્રીચરણસહસ્રનામાવલિઃ ।

શુક્લામ્બરધરં વિષ્ણું શશિવર્ણં ચતુર્ભુજમ્ ।
પ્રસન્નવદનં વન્દે સર્વવિઘ્નોપશાન્તયે ॥ ૧॥

પુસ્તકજપવટહસ્તે વરદાભયચિહ્નચારુબાહુલતે ।
કર્પૂરામલદેહે વાગીશ્વરિ શોધયાશુ મમ ચેતઃ ॥ ૨॥

નારાયણઃ પદ્મભવો વસિષ્ઠઃ શક્તિશ્ચ તત્પુત્રપરાશરશ્ચ ।
વ્યાસઃ શુકો ગૌડપદો યમીન્દ્રો ગોવિન્દયોગીતિ ગુરુક્રમોઽયમ્ ॥ ૩॥

આદ્યઃ શ્રીશઙ્કરાચાર્યોભગવત્પાદસંજ્ઞકઃ ।
અવતીર્ણઃ શમ્ભુરિતિ પ્રથિતઃ કાલટીપદે ॥ ૪॥

સુરેશ્વરઃ પદ્મપાદો હસ્તામલકતોટકૌ ।
સર્વજ્ઞશ્ચેતિ તચ્છિષ્યાઃ પ્રથિતા ગુરુસન્નિભાઃ ॥ ૫॥

શઙ્કરઃ કામકોટ્યાખ્યં પીઠં કાઞ્ચ્યાં વ્યરાજયત્ ।
પ્રત્યસ્થાપયદદ્વૈતં પીઠેસર્વજ્ઞકે સ્થિતઃ ॥ ૬॥

આત્માનમનુ સર્વજ્ઞં સુરેશ્વરમતે સ્થિતમ્ ।
ગોપ્તારં કામકોટ્યાખ્યપીઠસ્ય વ્યદધાદ્ગુરુઃ ॥ ૭॥

તદાદ્યેન્દ્રસરસ્વત્યાખ્યાઽવિચ્છિન્ના પરમ્પરા ।
પાતિ નો ગુરુવર્યાણાં શારદામઠસુસ્થિતા ॥ ૮॥

અષ્ટષષ્ટિતમાચાર્યઃ શઙ્કરશ્ચન્દ્રશેખરઃ ।
વિરાજતે બ્રહ્મભૂતઃ સ્વં વૃન્દાવનમાસ્થિતઃ ॥ ૯॥

તસ્ય નામાન્યનન્તાનિ તદનુગ્રહભાજનૈઃ ।

ગીયન્તેઽનુદિનં ભક્ત્યા તદનુગ્રહકામ્યયા ॥ ૧૦॥

નામ્નાં સહસ્રં ગૌણેભ્યસ્તન્નામભ્યઃ પ્રકીર્તયે ।
ચિત્તશુદ્ધ્યૈ તત્પ્રસાદલબ્ધ્યૈ લોકશિવાય ચ ॥ ૧૧॥

તદાર્હન્ત્યૈ પ્રપદ્યે તાન્ કામકોટિગુરૂત્તમાન્ ।
પ્રપન્નવત્સલાન્ લોકહિતાચરણતત્પરાન્ ॥ ૧૨॥

ધ્યાનમ્ -
અપારકરુણાસિન્ધું જ્ઞાનદં શાન્તરૂપિણમ્ ।
શ્રીચન્દ્રશેખરગુરું ધ્યાયામિ તમહર્નિશમ્ ॥ ૧૩॥

શ્રીશઙ્કરાર્યમપરં શ્રીશિવાશિવરૂપિણમ્ ।
પૂજ્યશ્રીકામકોટ્યાખ્યપીઠગં તં દયાનિધિમ્ ॥ ૧૪॥

અથ સહસ્રનામાવલિઃ।

ૐ અપારકરુણાસિન્ધવે નમઃ । જ્ઞાનદાય નમઃ । શાન્તમાનસાય નમઃ ।
શ્રી ચન્દ્રશેખરગુરવે નમઃ । શુચયે નમઃ । દાન્તાય નમઃ ।
તપોરતાય નમઃ । ઋજવે નમઃ । ક્ષમાપરાય નમઃ ।
અતર્ક્યાય નમઃ । સ્થિરધિયે નમઃ । અચલાય નમઃ । અમલાય નમઃ ।
અષ્ટષષ્ટિતમાચાર્યશઙ્કરાય નમઃ । દેશિકાગ્રણ્યૈ નમઃ ।
કાઞ્ચીરાજત્કામકોટીપીઠાલઙ્કૃતિ વિશ્રુતાય નમઃ ।
કામકોટીપીઠકૃત્યનિર્વાહોદ્યુક્તપૂર્વજાય નમઃ । જયાબ્દવૈશાખજાતાય નમઃ ।
પ્રતિપત્તિથિસમ્ભવાય નમઃ । આર્યાભિખ્યાતગોવિન્દ
યજ્વદૌહિત્રવંશજાય નમઃ । ૨૦

ૐ કુલદેવતયાઽઽખ્યાતસ્વામિશૈલેશનામવતે નમઃ ।
નાગેશ્વરાર્યદૌહિત્રાય નમઃ । મીનાક્ષીતનુજાભવાય નમઃ ।
સુબ્રહ્મણ્યાત્મજાય નમઃ । સૂરયે નમઃ । અનુરાધાભવાય નમઃ ।
સુહૃદે નમઃ । મહાલક્ષ્મીગર્ભધૃતાય નમઃ । ઋગ્વેદિને નમઃ ।
હરિતાન્વયાય નમઃ । હોસલસ્માર્તકુલજાય નમઃ । કર્ણાટીમાતૃભાષણાય નમઃ ।
ગણપત્યનુજાય નમઃ । સામ્બલલિતાદિપુરોભવાય નમઃ ।
પરાભવાબ્દમાધાત્તતુર્યાશ્રમાય નમઃ । ઉદારધિયે નમઃ ।
સર્વજ્ઞભગવત્પાદાચાર્યરૂપાય નમઃ । મહાયશસે નમઃ ।
મહાદેવેન્દ્રયતિરાડનુગાય નમઃ । બાલસંયમિને નમઃ । ૪૦

ૐ રક્તશુક્લપ્રભામિશ્ર શ્રી ગુરુધ્યાનનિર્વૃતાય નમઃ ।
કલવૈગ્રામે આરૂઢપીઠાય નમઃ । ગુરુપદસ્થિતાય નમઃ ।
પ્લવઙ્ગચૈત્રે પટ્ટાભિષિક્તાય નમઃ । દેશિકસત્તમાય નમઃ ।
પ્રમુખસૂરિભ્યો ગૃહીતવિદ્યાય નમઃ । તત્ત્વવિત્તમાય નમઃ ।
મહેન્દ્રમઙ્ગલગુરુકુલવાસિને નમઃ । દ્વિજાવૃતાય નમઃ । દક્ષાય નમઃ ।
તીર્થાત્તશાસ્ત્રાર્થાય નમઃ । તીર્થીકૃતનિજાશ્રિતાય નમઃ ।
સર્વતઃ સારસઙ્ગ્રાહિણે નમઃ । સમ્ભાષારસિકાગ્રણ્યૈ નમઃ । સારજ્ઞાત્રે નમઃ ।
અવિસંવાદિને નમઃ । જ્ઞાતજ્ઞેયાય નમઃ । વિશાલધિયે નમઃ ।
પરચિત્તવિદે નમઃ । એકાન્તચિન્તકાય નમઃ । ૬૦

ૐ અમર્ષવર્જિતાય નમઃ । સંસ્કૃતદ્રાવિડાન્ધ્રાદિબહુભાષાવિશારદાય નમઃ ।
સ્વયં શિષ્ટાય નમઃ । શિષ્ટજનવૃતાય નમઃ । ધર્મ્યે
પથિ સ્થિતાય નમઃ । શુદ્ધાય નમઃ । ત્રિષવણસ્નાયિને નમઃ ।
કાષાયામ્બરવેષ્ટિતાય નમઃ । આદ્યશઙ્કરયોગીન્દ્રસમયાનુગતૌ
રતાય નમઃ । બાહુદણ્ડલસદ્દણ્ડાય નમઃ । કરાગ્રગકમણ્ડલવે નમઃ ।
ફાલભાગલસદ્ભૂતિપુણ્ડ્રાય નમઃ । અતિવિમલાનનાય નમઃ ।
સ્વદણ્ડપૂજનરતાય નમઃ । દણ્ડદૃષ્ટેશ્વરાય નમઃ । સુધિયે નમઃ ।
ભૂતિપ્રલિપ્તાવયવાય નમઃ । પુણ્યતીર્થકૃતાપ્લવાય નમઃ ।
અગ્નિર્વાયુર્જલં સર્વં ભસ્મેતિ મનને રતાય નમઃ । સદા ત્રિયમ્બક
મનુજાપિને નમઃ । ૮૦

ૐ શિવતનવે નમઃ । શિવાય નમઃ । ધૃતરુદ્રાક્ષમકુટાય નમઃ ।
જનદૃષ્ટશિવાકૃતયે નમઃ । રુદ્રાક્ષમાલાભરણાય નમઃ ।
કમ્રાય નમઃ । મન્દગતયે નમઃ । વ્રતિને નમઃ । ધર્મમાર્ગાગ્રગામિને નમઃ ।
અનુગમાર્ગપ્રદર્શકાય નમઃ । વાણીવિહારિજિહ્વાગ્રાય નમઃ ।
લોકસઙ્ગ્રહણે રતાય નમઃ । સુન્દરી ચન્દ્રમૌલીશપદાબ્જમધુપાન્તરાય નમઃ ।
શ્રીમહાદેવ યતિરાડીપ્સિતાચારસંયતાય નમઃ ।
શ્રીચન્દ્રશેખરયતિદૃષ્ટતુર્યાશ્રમસ્થિતયે નમઃ ।
શ્રીમેરુમધ્યબિન્દુસ્થ સુન્દરીધ્યાનતત્પરાય નમઃ ।
કૈલાસાનીતયોગાખ્યશિવલિઙ્ગ કૃતાર્હણાય નમઃ ।
પૂજામણ્ડપવાહાદિસમલઙ્કૃતિ તત્પરાય નમઃ । ગણેશાદિત્યગોવિન્દ
શિવાશઙ્કર પૂજકાય નમઃ । અદ્વૈતભાવનાપેતભેદધિયે નમઃ । ૧૦૦

ૐ સગુણેક્ષણાય નમઃ । સર્વં બ્રહ્મેતિ કૃતધિયે નમઃ ।

સર્વત્રબ્રહ્મભાવનાય નમઃ । પઞ્ચાયતનસુજ્ઞેયદેવપૂજન તત્પરાય નમઃ ।
શ્રી રુદ્રપાઠનિરતાય નમઃ । અતિરુદ્રાદિ પ્રવર્તકાય નમઃ ।
શિવાર્પિતમનઃ કાયાય નમઃ । સર્વત્ર શ્રી શિવેક્ષણાય નમઃ ।
ક્ષેત્રયાત્રાપરાય નમઃ । વિશ્વાકારબ્રહ્મવિમર્શકાય ક્ષેત્રેશપૂજકાય નમઃ ।
ચિન્તા ક્રિયાન્વયકૃતૌ ક્ષમાય નમઃ । સદ્વૃત્તજનતાભાગ્યાય નમઃ ।
સાધુતર્પણભાષણાય નમઃ । ચિદ્રસાર્દ્રાય નમઃ ।
સત્તમાનામતિરોધાપિતક્રમાય નમઃ । ઊહાદ્યગમ્ય વ્યાપારાય નમઃ ।
અનલસાય નમઃ । સફલોદ્યમાય નમઃ । સુવ્રતાય નમઃ । ૧૨૦

ૐ સુખદાચારાય નમઃ । સુકૃતિને નમઃ । સુકૃતાર્હણાય નમઃ ।
કષ્ટાવહવ્રતિને નમઃ । કષ્ટાચિન્તકાય નમઃ । સુકરોદ્યમાય નમઃ ।
સ્વાર્થે નિર્વ્યાપારલવાય નમઃ । જનતાહિતે વ્યાપૃતાય નમઃ ।
દુર્જ્ઞેયવસ્તુ નિવહલઘૂકરણ ભાષણાય નમઃ । નિર્લક્ષ્યાય નમઃ ।
લબ્ધલક્ષ્યાર્થાય નમઃ । વાઙ્મનોઽતીતચિન્તકાય નમઃ ।
વિવિધાપ્તજનપ્રાર્થ્ય દર્શનાય નમઃ । અગૂઢચર્યકાય નમઃ ।
કાલદેશાવધિકૃતનિયન્ત્રણબહિર્ભવાય નમઃ ।
નિગમાગમનિર્ભાતતત્ત્વાન્વેષિણે નમઃ । વિચારવતે નમઃ ।
દૃષ્ટમાત્રેણાસ્પષ્ટાય નમઃ । શાન્તાય નમઃ । સુગ્રહવિગ્રહાય નમઃ । ૧૪૦

ૐ ભૂતભૂતેન્દ્રિયમનોવશીકરણતત્પરાય નમઃ ।
દુર્લભ્યવસ્તુસુલભીકરણે માર્ગદર્શકાય નમઃ । ઉદ્યુક્તાય નમઃ ।
પુરુષાર્થાર્થિને નમઃ । સાન્દ્રાનન્દાવબોધકાય નમઃ ।
તન્વા વાચા ધિયાઽક્ષુદ્રાય નમઃ । ક્ષુદ્રચેતોવિદૂરગાય નમઃ ।
વિશ્વપીડાપહાનાય યતાય નમઃ । સ્થિરતરાત્મધિયે નમઃ ।
રજસ્તમોઽનાકુલિતસત્ત્વવૃત્તયે નમઃ । પ્રશાન્તધિયે નમઃ ।
પરાનન્દામૃતાસ્વાદિને નમઃ । કુપરિસ્થિતૌ નિષ્કમ્પાય નમઃ ।
નિત્યપૂર્ણપરબ્રહ્મલીનધિયે નમઃ । અકૃતાન્તરાય નમઃ ।
અવ્યાપૃતાય નમઃ । અનેકકૃત્યવ્યાપૃતાય નમઃ । રાગદૂરગાય નમઃ ।
ઉદ્યત્સૂર્યાભવક્ત્રશ્રિયે નમઃ । ભાલરાજિત્રિરેખકાય નમઃ । ૧૬૦

ૐ પ્રવ્રાજે નમઃ । પ્રવાડ્ગણોદ્દીપાય નમઃ । કાષાયામ્બરશાયનાય નમઃ ।
કૌપીનરાજત્કટિકાય નમઃ । વસ્ત્રાલઙ્કૃત્યનિર્ભરાય નમઃ ।
વેદવચસા મહિતાય નમઃ । વેદવાચનૈર્મોહિતાય નમઃ । સ્વાચરણૈઃ
કાન્તાય નમઃ । કાન્તિનિધાનાય નમઃ । મધુરેહિતાય નમઃ । પૂર્વભાષિણે નમઃ ।

મધુરવાચે નમઃ । નિકટસ્થાય નમઃ । હિતૈષણાય નમઃ ।
હૃદા વિભવે નમઃ । શક્ત્યા પ્રભવે નમઃ । લોકસઙ્ગ્રહે કુતુકિને નમઃ ।
પ્રભવિષ્ણવે નમઃ । પ્રભવિત્રે નમઃ । નિશ્ચેષ્ટાય નમઃ । ૧૮૦

ૐ ચેષ્ટિતાખિલાય નમઃ । નેત્રદ્વયમતિપ્રીતિદાયકાચરણાય નમઃ ।
કૃતિને નમઃ । અમ્બાધ્યાનામૃતસ્યન્દ સન્દોહાપ્લુતમાનસાય નમઃ ।
ધરાધરસુતાદિવ્યકથામૃતકૃતાદરાય નમઃ । સૌન્દર્યલહરીપાને
પાયનેઽશ્રુપરિપ્લુતાય નમઃ । પુરઃસન્નિહિતાનમ્રજનાભીષ્ટ
દવાક્સુધાય નમઃ । પરમાનન્દસાન્દ્રાત્મભાષણાલ્લોકનન્દકાય નમઃ ।
પરભક્તિપ્લુતાય નમઃ । દેવી ચન્દ્રમૌલિપ્રપૂજકાય નમઃ । કારુણ્યાત્મને નમઃ ।
આશ્રિતહિતાચરણાય નમઃ । અમેય હૃદ્ગતાય નમઃ । વાગીશાનાય નમઃ ।
મધુરવાચે નમઃ । સ્વાત્મદાય નમઃ । અવિશેષદૃશે નમઃ ।
દયાગુરવે નમઃ । લોકહિતપ્રવણીકૃતસજ્જનાય નમઃ । અનભ્યર્થિને નમઃ । ૨૦૦

ૐ અર્થિનિવહવિશ્રાણિતધનાદિકાય નમઃ ।
લોકાહિતાવહજનનેતૃસૌમત્યદાયકાય નમઃ । નિગ્રહાનુગ્રહચણાય નમઃ ।
અસઙ્ગાય નમઃ । ભગવદાશ્રિતાય નમઃ । ભક્તેષ્ટદાય નમઃ ।
પારિજાતસમાય નમઃ । સ્વાત્મન ઈશિત્રે નમઃ । અર્થિવ્રજાર્તિહરણ
નિયોજિતધનિવ્રજાય નમઃ । સ્ફીતભાગ્યપ્રદાનોત્કચરણાય નમઃ ।
સ્વાત્મનિષ્ઠિતાય નમઃ । કીર્ત્યાય નમઃ । ગુણગણાધારાય નમઃ ।
સૌન્દર્યલહરીરતાય નમઃ । સ્વાઙ્ગભાસ્વત્તપઃ શ્રીકાય નમઃ ।
વિશ્વતેજસે નમઃ । વિભાવિતાય નમઃ । મહિતાચાર્યચરણાય નમઃ ।
અખિલવિદે નમઃ । વેદ્યદર્શનાય નમઃ । ૨૨૦

ૐ ઈશિત્રે નમઃ । ઈશિતસન્મર્ત્યાય નમઃ । શારદામઠસુસ્થિતાય નમઃ ।
વિદ્યાવતે નમઃ । વિમલોદ્યોગાય નમઃ । વિજ્ઞાય નમઃ ।
નિઃસ્પૃહચેષ્ટિતાય નમઃ । અસક્તાય નમઃ । સુખસંવેત્રે નમઃ ।
અદીનાય નમઃ । શોકવિવર્જિતાય નમઃ । વિવાસિને નમઃ । વિજને ગાનરતાય નમઃ ।
વીણાવિનોદવતે નમઃ । શક્રવાટીદ્રુમતતિલઘૂકારિશિવાસ્મૃતયે નમઃ ।
શિવયોર્ધ્યાનયોગેન શિવીકૃતજગત્ત્રયાય નમઃ ।
આત્મારામાય નમઃ । આત્મદૃષ્ટિપાવિતસ્વજનાય નમઃ । મહતે નમઃ ।
શઙ્કૃત્યધિકૃતૈશ્વર્યાય નમઃ । ૨૪૦

ૐ શઙ્કરાર્પિતચિન્તનાય નમઃ । નિઃસ્પૃહૈર્વિગીતાય નમઃ ।

સેવ્યાય નમઃ । સઙ્ગવાર્તાવિનાકૃતાય । પ્રેમાર્દ્રહાસાય નમઃ ।
મધુરવચસે નમઃ । ક્ષિપ્રપ્રસાદનાય નમઃ । દૃશ્યાય નમઃ ।
સુનાસાય નમઃ । સુગ્રીવાય નમઃ । વિભૂત્યઙ્કિતફાલકાય નમઃ ।
કણ્ઠોજ્જ્વલત્સુરુદ્રાક્ષમાલયોન્નતકન્ધરાય નમઃ ।
રુદ્રાક્ષભૂષિતશ્રોત્રાય નમઃ । રુદ્રાક્ષાવલિશેખરાય નમઃ ।
કરલમ્બિતરુદ્રાક્ષજપમાલાય નમઃ । સુદર્શનાય નમઃ ।
તુલસીબિલ્વમાલાધૃક્શિરસે નમઃ । પ્રણતવત્સલાય નમઃ ।
નારાયણેતિવ્યાહારદત્તાશીર્વચનાય નમઃ । અનઘાય નમઃ । ૨૬૦

ૐ નારાયણેતિવ્યાહારસ્મૃતગોવિન્દદત્તધિયે નમઃ ।
ભગવદ્રૂપકલનાવ્યાપૃતક્ષણાય નમઃ । ઈડિત્રે નમઃ ।
આત્મસમ્પદ્રતાય નમઃ । સમ્પદ્ધશ્રદ્ધાય નમઃ । સ્વાશ્રિતાશ્રયાય નમઃ ।
અચ્યુતસ્મૃતિલીનાત્મને નમઃ । અચ્યુતાય નમઃ ।
અચ્યુતનિજાશ્રિતાય નમઃ । ચિરન્તનોક્તિમહિતવેદરક્ષાપરાયણાય નમઃ ।
આશ્ચર્યદર્શિને નમઃ । વિશ્વગાશ્ચર્યદર્શને
કુતુકિને નમઃ । મહીયસાઽપિ મહિતાય નમઃ । મહનીયાય નમઃ ।
મહામનસે નમઃ । દર્પણાલોકિતજગદ્બોધિતાત્મસ્વરૂપદૃશે નમઃ ।
લબ્ધાયાસસુનિર્વર્ત્યસત્કર્મસુ નિયોજકાય નમઃ । ક્લિષ્ટતર્કારતાય નમઃ ।
નીતિમાર્ગજ્ઞાય નમઃ । નીતિબોધકાય નમઃ । ૨૮૦

ૐ ઐહિક શ્રેયસો વક્ત્રે નમઃ । આમુષ્મિક હિતાવહાય નમઃ । મૃદવે નમઃ ।
મૃદુતરસ્વાન્તાય નમઃ । બહ્વર્થલલિતસ્મિતાય નમઃ ।
લલિતાન્યસ્તસર્વસ્વાય નમઃ । સદયાય નમઃ । દયિતાશ્રિતાય નમઃ ।
મહામહિમરાષ્ટ્રેશ સચિવાદ્યભિવન્દિતાય નમઃ ।
કાશીનેપાલરાષ્ટ્રેશકૃતપાદાભિવન્દનાય નમઃ ।
ધર્મ્યમાર્ગગસન્નેતૃન્યસ્તધર્માભિરક્ષણાય નમઃ ।
સૌન્દર્યલહરીમુખ્યસ્તુતિતત્ત્વવિદગ્રણ્યૈ નમઃ ।
શિવાકારાય નમઃ । શિવાનન્દલહરીમગ્નમાનસાય નમઃ ।
ભગવત્પાદરચિતસ્તોત્રપારાયણોત્સુકાય નમઃ ।
આદ્યાચાર્યાખિલગ્રન્થસારવેત્ત્રે નમઃ । પ્રગલ્ભવાચે નમઃ ।
ક્રોધદૂરાય નમઃ । ક્રોધયન્ત્રે નમઃ । યતાય નમઃ । ૩૦૦

ૐ દાન્તનિજાન્તરાય નમઃ । સ્વચ્છન્દવૃત્તયે નમઃ । અચ્છન્દાય નમઃ ।
ધર્મચ્છન્દાનુવર્તનાય નમઃ । તચ્છબ્દવાચ્યચિન્તાકાય નમઃ ।

તદર્થાત્મનિયોજકાય નમઃ । તદ્વશાય નમઃ ।
તત્પદજ્ઞેયસગુણાજ્ઞાવશંવદાય નમઃ । સગુણબ્રહ્મદત્તેક્ષાય નમઃ ।
સગુણાભ્યર્હણે રતાય નમઃ । સગુણેઽર્પિતસર્વસ્વાય નમઃ ।
સગુણાન્નિર્ગુણેક્ષકાય નમઃ । ભક્તપ્રિયાય નમઃ । ભક્તિવેદ્યાય નમઃ ।
ભક્તિવશ્યાય નમઃ । ભવાર્ચકાય નમઃ । ભક્તસૌભાગ્યઘટકાય નમઃ ।
ભક્તેષ્ટાચરણપ્રિયાય નમઃ । મન્ત્રજાપિને નમઃ । મન્ત્ર
સિદ્ધાય નમઃ । ૩૨૦

ૐ મન્ત્રાર્થમનને રતાય નમઃ । ભાવનાગમ્યલલિતામહિમાવેક્ષણે
રતાય નમઃ । ભવારણ્યકુઠારાત્માનન્દલબ્ધિસુનિર્વૃતાય નમઃ ।
મહાયોગેશ્વરાય નમઃ । તન્ત્રમન્ત્રયોગવિદે નમઃ । અર્હિતાય નમઃ ।
પરાત્મભાવનાલીનાય નમઃ । મન્ત્રતન્ત્રાદ્યુપેક્ષકાય નમઃ । નિર્મમાય નમઃ ।
નિરહઙ્કારાય નમઃ । નિષ્કામાય નમઃ । નિષ્પરિગ્રહાય નમઃ ।
અક્લેશતો ધીકાલુષ્યહારિણે નમઃ । વિમલધીપ્રદાય નમઃ ।
પ્રમોદભરિતસ્વાન્તાય નમઃ । નિર્વૃતાત્મને નમઃ । ઈશચિન્તકાય નમઃ ।
ધન્યાય નમઃ । ધન્યસ્મૃતયે નમઃ । ધન્યતાપાદકવચઃ
સ્મૃતયે નમઃ । ૩૪૦

ૐ તપસાઽધિગતસ્વેષ્ટાય નમઃ । અગદાય નમઃ । ગદનિવારણાય નમઃ ।
દેવીપદાબ્જસ્મરણરસિકાય નમઃ । નામજાપકાય નમઃ ।
આધિવ્યાધિહરાય નમઃ । દીનજનવિશ્રાન્તિદાયકાય નમઃ ।
ચિદ્રૂપસદ્દર્શનાપ્તાનન્દાય નમઃ । સમ્મોદસમ્ભૃતાય નમઃ ।
ગૂઢાત્મગતયે નમઃ । અવ્યગ્રાય નમઃ । પ્રૌઢયોગગતૌ ચણાય નમઃ ।
દેવીનામસ્મૃતિપ્રાપ્તનૈરુજાય નમઃ । તાપવર્જિતાય નમઃ । ધર્મ્યાચારે
દૃઢમતયે નમઃ । ઈશેજ્યાધૂતકલ્મષાય નમઃ । ઈશાલોકોત્કનયનાય નમઃ ।
ઈશગાથારતશ્રવસે નમઃ । પરાઙ્મુખસ્યાભિમુખીકરણે
ચાટુવાક્તતયે નમઃ । આર્તપ્રલાપિજનતોત્સાહકૃતે નમઃ । ૩૬૦

ૐ દૈન્યનાશકાય નમઃ । યમાદિનિરતાય નમઃ । શાન્તિદાન્તિભૂમ્ને નમઃ ।
સમાધિમતે નમઃ । શુભદર્ભાસનાસીનાય નમઃ । મૃગાજિનકૃતાસનાય નમઃ ।
તારમન્ત્રજપે લીનાય નમઃ । પ્રાણવાયુનિયામકાય નમઃ ।
ઈશે વિશ્વાત્મભાવાઢ્યાય નમઃ । વિશ્વ ઈશાત્મભાવનાય નમઃ ।
તારત્ર્યવયવધ્યાત્રે નમઃ । તારનાદોન્મુખશ્રવસે નમઃ ।
ધારણાચ્યવનક્લિન્નાય નમઃ । પુનઃ સિદ્ધાત્મધારણાય નમઃ ।

ધારણાનિર્વૃતાય નમઃ । ધ્યાનલબ્ધાત્માનન્દાય નમઃ । આત્મવતે નમઃ ।
અનાવૃતપદસ્થાયિને નમઃ । બ્રહ્મભાવાદવિચ્યુતાય નમઃ ।
અક્લિષ્ટકારિણે નમઃ । ૩૮૦

ૐ સુકરધ્યાનમાર્ગપ્રદર્શકાય નમઃ । સ્નિગ્ધાય નમઃ ।
સમાય નમઃ । મધુરગિરે નમઃ । મધુરાન્મધુરેક્ષણાય નમઃ ।
અવ્યાજકરુણાપૂર્ણહૃદયાય નમઃ । કરુણેક્ષણાય નમઃ ।
નિસ્તુલાય નમઃ । તુલનાહીન બ્રહ્મવસ્તુનિવિષ્ટધિયે નમઃ ।
દુષ્ટદૂરાય નમઃ । દુષ્ટજનપાવનાય નમઃ । દુષ્ટતાપહાય નમઃ ।
આર્યધર્મકામકોટિમુખપત્રપ્રવર્તકાય નમઃ ।
બિમ્બગ્રહકલાભિજ્ઞાય નમઃ । ગાયકાય નમઃ । ગીતસારવિદે નમઃ ।
જ્ઞાનસમ્બન્ધવાગીશમુખગીતાન્તરાર્થદૃશે નમઃ ।
મણિવાચકગોદેશસુપ્રભાત સ્તુતેશ્વરાય નમઃ ।
શ્રીમદ્રામાયણકથાશ્રવણે કુતુકિને નમઃ । શમિને નમઃ । ૪૦૦

ૐ રામનામપ્રભાવજ્ઞાય નમઃ । રામચારિત્રવિસ્મિતાય નમઃ ।
શ્રીરામનામલેખોત્કજનતોત્સાહવર્ધનાય નમઃ । કોટિસઙ્ખ્યાક
શ્રી રામનામલેખપ્રવર્તકાય નમઃ । શુકવાગમૃતાસ્વાદિને નમઃ ।
શ્રીકૃષ્ણધ્યાનલીનધિયે નમઃ । કૃતાર્થચિત્તાય નમઃ ।
ધન્યાત્મને નમઃ । ધન્યવાક્કાયમણ્ડલાય નમઃ । સમાકૂતયે નમઃ ।
સહૃદયાય નમઃ । સમનસે નમઃ । સઙ્ગવર્જિતાય નમઃ ।
સમાય નમઃ । સ્વપરભેદાજ્ઞાય નમઃ । ક્ષમયા પૃથિવીસમાય નમઃ ।
કરુણાસ્યન્દિદૃક્પાતાય નમઃ । ગીતદેવારરઞ્જિતાય નમઃ ।
દેવારશ્રવણપ્રીતિધાત્રે નમઃ । દેવારતત્ત્વવિદે નમઃ । ૪૨૦

ૐ દેવાર ગાયકગણરક્ષકાય નમઃ । મધુગાયનાય નમઃ ।
વિદ્વન્મહિતદેવારગીતાય નમઃ । પરશિવાકૃતયે નમઃ ।
સુધામધુરભાષિણે નમઃ । અલ્પાક્ષરાય નમઃ । ભૂર્યર્થવેદકાય નમઃ ।
અક્ષિતેજોધૂતપાપાય નમઃ । ગોબ્રાહ્મણહિતે રતાય નમઃ ।
ગોશાલાપાલનવ્યગ્રાય નમઃ । વૃદ્ધાનાથ સુપોષકાય નમઃ ।
યતિમણ્ડલસંવીતાય નમઃ । બાલચિત્તવિનોદનાય નમઃ ।
ભક્તમાનસરાજીવમિત્રાય નમઃ । મૈત્રીદયાવ્રતિને નમઃ ।
આઙ્ગલ્યાદિબહુભાષાવિદે નમઃ । નવ્યવિજ્ઞાનસૂક્ષ્મવિદે નમઃ ।
સ્વભાષયાઽન્યભાષાવિદ્વણસમ્ભાષણોત્સુકાય નમઃ ।

નવ્યવિજ્ઞાન-વિન્મુખ્યૈઃ તત્ત્વવિદ્યાવિચારકૃતે નમઃ ।
સમ્ભાષાજ્ઞાતવિજ્ઞાનતારતમ્યગવેષકાય નમઃ । ૪૪૦

ૐ પાદમૂલનતાનેકવિપશ્ચિદ્ગણસંવૃતાય નમઃ ।
સદ્ગોષ્ઠીમહિતાય નમઃ । સાધુહિતાચારાય નમઃ । સતાઙ્ગતયે નમઃ ।
ભગવચ્છઙ્કરગુરોરપરાકૃતયે નમઃ । ઉત્તમાય નમઃ ।
કાષાયવાસસે નમઃ । વિધ્વસ્તકષાયાય નમઃ । દેશિકોત્તમાય નમઃ ।
શિરોવેષ્ટિતકાષાયવાસોઽચ્છન્નમુખામ્બુજાય નમઃ ।
વિશાલવક્ષસે નમઃ । નિષ્ટપ્તહેમાભતનવે નમઃ । ઊર્જિતાય નમઃ ।
વેદાધ્યયનશાલાકૃતે નમઃ । વેદાધીતિકૃતાદરાય નમઃ ।
વેદરક્ષાસમિતિકૃતે નમઃ । વેદાધ્યાપકમણ્ડનાય નમઃ ।
ત્રયીપદવિભાગજ્ઞવેદાધ્યાપકરક્ષકાય નમઃ ।
અનધીતિવશાલ્લુપ્તવેદશાખાગવેષકાય નમઃ ।
વિમાનિતદ્વિજગણસમ્માનનકૃતાદરાય નમઃ । ૪૬૦

ૐ પદક્રમજટાપાઠે વિદ્યાર્થ્યુત્સાહવર્ધનાય નમઃ ।
જયાખ્યેન્દ્રસરસ્વત્યા કૃતપાદાભિવન્દનાય નમઃ ।
શ્રીશઙ્કરવિજયેન્દ્ર સરસ્વત્યભિવન્દિતાય નમઃ ।
શ્રીજયેન્દ્રગુરુપ્રેરકેચ્છાશક્તયે નમઃ । પ્રભાવનાય નમઃ ।
ક્રિયાશક્તિ શ્રીજયેન્દ્રપૂરિતેચ્છાય નમઃ । વિભાવનાય નમઃ ।
ગુરુપ્રિયાબ્રહ્મસૂત્રવૃત્તિકૃચ્છિષ્યતોષિતાય નમઃ ।
રાજરાજાખ્યચોલસ્ય સ્વર્ણમૌલિકૃતાર્હણાય નમઃ ।
ગુરોર્હૃદ્ગતસઙ્કલ્પક્રિયાન્વયકૃદાશ્રવાય નમઃ ।
કામાક્ષીવાહકસ્વર્ણરથકલ્પનનિર્ભરાય નમઃ ।
કામાક્ષ્યમ્બાલયસ્વર્ણચ્છાદકાય નમઃ । હેમદીપ્તિમતે નમઃ ।
કાશ્યાં શ્રી કામકોટીશાલયકર્ત્રે  નમઃ । વિદાંવરાય નમઃ ।
કુમ્ભાભિષેચનાદીપ્તદેવાલયાય નમઃ । ઉદારધિયે નમઃ ।
કાલટ્યાં શઙ્કરગુરોઃ કીર્તિસ્તમ્ભકૃતાર્હણાય નમઃ ।
ચિદમ્બરેશકરુણાપ્લાવિતાય નમઃ । શૈવવાગ્રતાય નમઃ । ૪૮૦

ૐ રત્નભૂષિતનૃત્યેશહસ્તશીર્ષપદામ્બુજાય નમઃ ।
શ્રીચક્રાત્મકતાટઙ્કનવીકરણમોદિતાય નમઃ ।
શ્રીકામાક્ષ્યાઃ સહસ્રાખ્યામાલાલઙ્કરણક્ષમાય નમઃ ।
પદયાત્રાલઙ્ઘિતાધ્વને નમઃ । સદા ક્ષેત્રતીર્થાટનાય નમઃ ।

ક્ષેમદાય નમઃ । જનતાયોગક્ષેમવિદે નમઃ । ભદ્રકારકાય નમઃ ।
વર્ણધર્મરહસ્યજ્ઞાય નમઃ । બ્રહ્મચર્યવ્રતે સ્થિતાય નમઃ ।
ભસ્મીકૃતૈષણાભત્રિભૂતિરેખાલલાટકાય નમઃ । ઊરીકૃતજગદ્રક્ષાય નમઃ ।
દૃક્કોણકરુણેક્ષણાય નમઃ । સુધાસ્રુતિસમાભાષાય નમઃ ।
કણ્ઠગસ્ફટિકાવલયે નમઃ । અમ્બિકાક્રીડસૌધાભાભયહસ્તાય નમઃ ।
પુરાનવાય નમઃ । ષડ્ભાવદૂરાય નમઃ । તપસા દીપ્તતેજસે નમઃ ।
બુધાર્હિતાય નમઃ । ૫૦૦

ૐ અન્તર્મુખાય નમઃ । સદા મૌનિને નમઃ । જિતતૃષ્ણાય નમઃ ।
જિતક્ષુધાય નમઃ । ગૈર્વાણવાણીસમ્પોષ લગ્નાય નમઃ । ક્ષામોદરાય નમઃ ।
કૃશાય નમઃ । લોકહિતે બહિર્મુખાય નમઃ । ઉપવાસરતાય નમઃ ।
અક્લમાય નમઃ । ધર્મપોષણસઙ્કલ્પાય નમઃ । ધર્મજ્ઞાય નમઃ ।
ધર્મ્યપાલનાય નમઃ । અસઙ્ગવિવૃતજ્ઞાનયોગાય નમઃ । વેત્રે નમઃ ।
જિતેન્દ્રિયાય નમઃ । શિષ્યોપદેશનિરતાય નમઃ । કાર્યાકાર્યપ્રબોધકાય નમઃ ।
જ્ઞાનમુદ્રાઞ્ચિતકરાય નમઃ । કુક્કુટાસનસુસ્થિતાય નમઃ । ૫૨૦

ૐ કાન્તાય નમઃ । પદ્માસનાસીનાય નમઃ । ક્વચિદુત્કટકસ્થિતાય નમઃ ।
પારિવ્રાજ્યાશ્રમયશઃકારકાય નમઃ । મન્ત્રતન્ત્રવિદે નમઃ ।
ત્રયીમાર્ગોપદેષ્ટ્રે નમઃ । અર્ચ્યાય નમઃ । સર્વતન્ત્રસ્વતન્ત્રધિયે નમઃ ।
વેદાન્તસ્મૃતિતત્ત્વજ્ઞાય નમઃ । દ્વૈતાદ્વૈતવિચક્ષણાય નમઃ ।
શ્રુતિસ્મૃતિપુરાણાદિ સારવિદે નમઃ । વિજ્ઞસમ્મતાય નમઃ ।
સારસ્વતાનુગ્રહદાય નમઃ । ગુણત્રયવિભાગવિદે નમઃ ।
કલિઘ્નાય નમઃ । કલ્યુચિતસત્સઙ્ગધાત્રે નમઃ । વિરક્તધિયે નમઃ ।
શૈવવૈષ્ણવશાક્તાદિલક્ષ્યભેદપ્રદર્શકાય નમઃ ।
ભગવન્નામરતિકૃતે નમઃ । નામજાપકમધ્યગાય નમઃ । ૫૪૦

ૐ અમાનુષચરિત્રાઢ્યાય નમઃ । અતિમાનુષવીર્યવતે નમઃ ।
તત્તદ્ભાષાગભજનસ્તુતિગીતપ્રકાશકાય નમઃ ।
ચિત્રકર્મરતાય નમઃ । ચિત્રદર્શનોત્સુકમાનસાય નમઃ ।
શિલ્પચિત્રકલાભિજ્ઞસંરક્ષણવિધૌ રતાય નમઃ ।
શિલ્પચિત્રકલાબોધિવિદ્યાલયવિધાયકાય નમઃ ।
શિલ્પિપ્રચોદકાય નમઃ । શિલ્પૈઃ કૃતાલયપરિષ્કૃતયે નમઃ ।
સ્વનામવિખ્યાતવિશ્વવિદ્યાલયસમીક્ષકાય નમઃ ।
વિશ્વરાષ્ટ્રીયસદ્ગ્રન્થાલયલબ્ધાત્મતોષણાય નમઃ ।

વિદ્યાલયવ્રાતકૃતિતુષ્ટાય નમઃ । વિદ્યાવિવર્ધનાય નમઃ ।
ભેરીપટહવાદ્યાદિમહિતસ્વાગતોત્સવાય નમઃ । સકૃત્સ્મરણ સન્તુષ્ટાય નમઃ ।
સર્વજ્ઞાય નમઃ । જ્ઞાનદાયકાય નમઃ । દરસ્મિતમુખામ્ભોજાય નમઃ ।
કાન્ત્યા વિજિતભાસ્કરાય નમઃ । સ્વાનુષ્ઠિત્યાખ્યાત કર્મયોગાય નમઃ । ૫૬૦

ૐ નેત્રે નમઃ । સ્વકર્મવિદે નમઃ । સ્વભક્તિયોગઘટિત
ચન્દ્રમૌલિપદદ્વયાય નમઃ । સપ્તકોટિમહામન્ત્રવેત્ત્રે નમઃ ।
જપ્તમહામનવે નમઃ । મૈત્ર્યાદિવાસનાવાપ્તસમધિયે નમઃ ।
લોકશર્મદાય નમઃ । વૈખરીજિતવાગીશાય નમઃ । આશાવર્ગજિદગ્રણ્યૈ નમઃ ।
પ્રાચ્યાગ્રહારરચનારસિકાય નમઃ । સ્થિતરક્ષકાય નમઃ ।
ગ્રામીણજનસદ્વૃત્તિવિધાત્રે નમઃ । વિહિતાર્થદૃશે નમઃ ।
શૈવાય નમઃ । શાક્તાય નમઃ । ગાણપતાય નમઃ । વૈષ્ણવાય નમઃ ।
અભેદદર્શકાય નમઃ । બ્રહ્મચર્યાત્પ્રવ્રજિતાય નમઃ ।
એષણાત્રયવર્જિતાય નમઃ । ૫૮૦

ૐ ભગવત્પાદસ્મૃત્યુત્થરોમાઞ્ચાય નમઃ । અરતિવર્જિતાય નમઃ ।
ભક્ત્યાવનમ્રવિજયજયેન્દ્રેડ્યાય નમઃ । યમીશ્વરાય નમઃ ।
પ્રપઞ્ચવ્યવહારાણાં સાક્ષિણે નમઃ । સઙ્ગવિવર્જિતાય નમઃ ।
દ્વન્દ્વાતીતાય નમઃ । સુહૃદયાય નમઃ । રાજયોગસ્થિરાન્તરાય નમઃ ।
અવસ્થાત્રિતયાતીતભાનવતે નમઃ । સૂરિતલ્લજાય નમઃ ।
વીક્ષાવિવશિતાશેષજનસ્વાન્તાય નમઃ । સ્વરાજે નમઃ । ગુહાય નમઃ ।
શિવાય નમઃ । ગુરવે નમઃ । શિવગુરવે નમઃ । શિવગુર્વાત્મજાશ્રિતાય નમઃ ।
શ્રીકામકોટિપીઠાગ્ર્યનિકેતાય નમઃ । ગુરુતલ્લજાય નમઃ । ૬૦૦

ૐ સ્વવૃત્તપ્રીણિતાશેષવિબુધાય નમઃ । વિબુધોત્તમાય નમઃ ।
મહાવાક્યસમામ્નાતતત્ત્વજ્ઞાય નમઃ । તત્ત્વબોધકાય નમઃ ।
ભક્તોપહૃતસદ્ગ્રન્થકૃતેક્ષાય નમઃ । તત્સ્થસારવિદે નમઃ ।
જ્ઞાનદાનોત્કમધુરવાગ્વિલાસાય નમઃ । મહામહસે નમઃ ।
મર્યાદોલ્લઙ્ઘનરતજનદૂરાય નમઃ । અવિદૂરગાય નમઃ । બાલકોત્સાહદાય નમઃ ।
બાલસુલભાય નમઃ । બાલદેશિકાય નમઃ । વ્યક્તાય નમઃ ।
અવ્યક્તાય નમઃ । અતિવિશદાય નમઃ । ચિન્મયાય નમઃ । ચિત્કલાધરાય નમઃ ।
આકાઙ્ક્ષ્યદર્શનાય નમઃ । નવ્યનવ્યરૂપધૃશે નમઃ । ૬૨૦

ૐ ઈશ્વરાય નમઃ । મૂકવાચાલકૃતે નમઃ ।

પઙ્ગુસુકરાદ્રીશલઙ્ઘનાય નમઃ । સચ્છિષ્યરક્ષિતાય નમઃ ।
શિષ્યરક્ષાકૃતે નમઃ । શિષ્યવત્સલાય નમઃ । પદવાક્યપ્રમાણજ્ઞાય નમઃ ।
પ્રસ્થાનત્રયપણ્ડિતાય નમઃ । ભક્તાનાં પરમસ્પષ્ટાય નમઃ ।
પરમાખ્યગુરુપ્રિયાય નમઃ । પરર્દ્ધ્યસ્પૃહાય નમઃ ।
આર્તેષ્ટદાત્રે નમઃ । ધર્મપરાયણાય નમઃ । પર્જન્યવદ્ધિતકરાય નમઃ ।
પરિગ્રહવિવર્જિતાય નમઃ । પવનાય નમઃ । પાવનાય નમઃ ।
પૂતસ્વાચારે પર્યવસ્થિતાય નમઃ । સ્મરણાદાધિશતહૃતે નમઃ ।
ભવરુગ્ભેષજાય નમઃ । ૬૪૦

ૐ ભિષજે નમઃ । પુણ્યકીર્તયે નમઃ । પુણ્યલભ્યદર્શનાય નમઃ ।
સ્મૃતિપાવનાય નમઃ । પુષ્કરાક્ષાય નમઃ । પુષ્પહાસાય નમઃ ।
પુરુજિતે નમઃ । પુરુસત્તમાય નમઃ । ભૂતભવ્યભવદ્દ્રષ્ટ્રે નમઃ ।
ભવ્યાય નમઃ । રુદ્રાક્ષભૂષણાય નમઃ । પ્રગ્રહાય નમઃ । પેશલાય નમઃ ।
પ્રાંશવે નમઃ । શિષ્યદોષપ્રતર્દનાય નમઃ । બ્રહ્મણે નમઃ ।
બ્રહ્મવિદામગ્ર્યાય નમઃ । પ્રસન્નાય નમઃ । બ્રહ્મભાવદાય નમઃ ।
ભ્રાજિષ્ણવે નમઃ । ૬૬૦

ૐ પ્રાણદાય નમઃ । પ્રાણનિલયાય નમઃ । પરસ્મૈ મઙ્ગલાય નમઃ ।
મનોજવાય નમઃ । મારુતજિત્શ્વાસાયામાય નમઃ । મહાક્રમાય નમઃ ।
મહોનિધયે નમઃ । મહાભાગાય નમઃ । મહાબુદ્ધયે નમઃ ।
મહાર્હણાય નમઃ । મૃદુસ્વનાય નમઃ । મહાવાગ્મિને નમઃ ।
મુક્ત્યર્થિનાં પરાયૈ ગત્યૈ નમઃ । સુમેધયા દૃષ્ટલોકવાર્તાકાય નમઃ ।
અદૃશ્યદર્શનાય નમઃ । ભગવત્પદવિશ્રાન્તાય નમઃ । સતાં
યોગવિદાં નેત્રે નમઃ । રવિમણ્ડલમધ્યસ્થ શ્રીમાત્રાલોકતત્પરાય નમઃ ।
ચન્દ્રમણ્ડલદૃષ્ટાત્મદૈવતાય નમઃ । ભાવનાબલિને નમઃ । ૬૮૦

ૐ વનમાલિસ્તુતિપરાય નમઃ । વરારોહાય નમઃ । ઉદારવાચે નમઃ ।
કર્ત્રે નમઃ । વિકર્ત્રે નમઃ । ગહનચેષ્ટાય નમઃ । ગુહ્યસ્વવિક્રમાય નમઃ ।
વિશ્વદૃષ્ટિવિશેષજ્ઞાય નમઃ । વિધેયવિનયાવહાય નમઃ ।
વિરજોમાર્ગસઞ્ચારિણે નમઃ । વિરામાય નમઃ । વિરજોઽયનાય નમઃ ।
આત્મારામાય નમઃ । જિતમનસે નમઃ । વિહાયસગતિપ્રિયાય નમઃ ।
વીરાય નમઃ । વીતભયાય નમઃ । વિષ્ણવે નમઃ । વેગવતે નમઃ ।
વીતદુર્ભગાય નમઃ । ૭૦૦

ૐ વ્યગ્રાય નમઃ । વ્યવસ્થિતાય નમઃ ।
અક્લિષ્ટવ્યવસાયાય નમઃ । અવ્યથક્રમાય નમઃ ।
વ્યાસસૂક્તિરતાય નમઃ । વ્યાસદૃષ્ટભારતભાવવિદે નમઃ ।
રામસેતુધનુષ્કોટિરામેશ્વરચિરસ્થિતયે નમઃ ।
અગ્નિતીર્થે દ્વાદશેશલિઙ્ગદર્શનનિર્વૃતાય નમઃ ।
અબ્ધિવેલાતિક્રમણરોધિમારુતિપૂજકાય નમઃ ।
વૃષારૂઢ મહેશાનદર્શનાસક્તાય નમઃ । ઉત્તરાય નમઃ ।
વાત્યાદિનષ્ટમાર્ગસ્થદીનાનાથાન્નદાનકૃતે નમઃ ।
વિવિક્તસેવિને નમઃ । વિજિતકરણાય નમઃ । પૂતહૃચ્છયાય નમઃ ।
જન્મમૃત્યુજરાભીતિપદાદાયિને નમઃ । જિતાન્તરાય નમઃ । જિતમન્યવે નમઃ ।
જિતક્રોધાય નમઃ । જિતામર્ષાય નમઃ । ૭૨૦

ૐ અવ્યથેન્દ્રિયાય નમઃ । જ્યોતિરાદિત્યદત્તેક્ષાય નમઃ ।
આત્મજ્યોતિષિ નિષ્ઠિતાય નમઃ । પ્રબલેન્દ્રિયસઙ્ઘર્ષજયિને નમઃ ।
ઇન્દ્રિયવિનોદનાય નમઃ । સ્વકૃત્યભરસંક્ષેપ્ત્રે નમઃ । સદાયોગિને નમઃ ।
સતાઙ્ગતયે નમઃ । સત્કૃતાય નમઃ । દ્વિજસત્કર્ત્રે નમઃ ।
સત્પથાચારદેશિકાય નમઃ । સત્વસ્થાય નમઃ । સત્વવતે નમઃ ।
સાધુસન્ધાત્રે નમઃ । સુસમીહિતાય નમઃ । સમિતિઞ્જયવાગ્ભૂતયે નમઃ ।
સર્વશાસ્ત્રવિદાં વરાય નમઃ । સર્વદર્શિને નમઃ । સર્વસહાય નમઃ ।
સર્વયોગવિનિઃસૃતાય નમઃ । ૭૪૦

સર્વાસુનિલયશ્રીમત્કામાક્ષીપદનિષ્ઠિતાય નમઃ । સહાય નમઃ ।
સહિષ્ણવે નમઃ । સર્વજ્ઞસાક્ષ્યાત્મને નમઃ । સિદ્ધસાધનાય નમઃ ।
પરાહન્તાભરન્યસ્ત સ્વાહમ્ભાવાય નમઃ । ઉપેક્ષકાય નમઃ ।
ધન્યનામ્ને નમઃ । ધન્યકૃતયે નમઃ । ધન્યતાપાદનક્ષમાય નમઃ ।
ધરાધરક્ષમાશીલાય નમઃ । દર્પઘ્ને નમઃ । સૌમ્યભાવનાય નમઃ ।
ધર્મગુપે નમઃ । ધર્મકૃતે નમઃ । ધર્મિણે નમઃ । ધર્માધ્યક્ષાય નમઃ ।
દુરારિઘ્ને નમઃ । દાક્ષિણ્યનિધયે નમઃ । આશાન્તખ્યાત કીર્તયે નમઃ । ૭૬૦

ૐ અદારુણાય નમઃ । ધૃતિમતે નમઃ । જિતષડ્વર્ગાય નમઃ । દીપ્તિમતે નમઃ ।
દુર્ગમાન્તરાય નમઃ । દુર્મર્ષણાય નમઃ । અપ્રતિરથાય નમઃ ।
તુરીયાત્મનિ નિષ્ઠિતાય નમઃ । દુઃસ્વપ્નઘ્ને નમઃ । દુષ્કૃતિઘ્ને નમઃ ।
વરદેશપ્રસાદનાય નમઃ । તેજોનિધયે નમઃ । દ્યુતિધરાય નમઃ ।
નિર્ધનાય નમઃ । દ્રવિણપ્રદાય નમઃ । ધૃતાત્મને નમઃ । આનન્દનાય નમઃ ।

નન્દિને નમઃ । નયનીતસ્વજીવનાય નમઃ । નિગ્રહાય નમઃ । ૭૮૦

ૐ નિગૃહીતાત્મને નમઃ । નિગ્રહાધ્વપ્રદર્શકાય નમઃ । નિયતાય નમઃ ।
અનિયમાય નમઃ । જેત્રે નમઃ । ધ્યાનનીતક્ષણાન્તરાય નમઃ ।
નૈકકર્મકૃતે નમઃ । અવ્યગ્રાય નમઃ । નૈકરૂપાય નમઃ । અનિરૂપિતાય નમઃ ।
ભગવતે નમઃ । ભગવત્પાદસ્મૃતિધન્યાય નમઃ । ભવાપહાય નમઃ ।
અનુત્તમપદદ્રષ્ટ્રે નમઃ । ભયકૃતે નમઃ । ભયનાશનાય નમઃ ।
અક્રૂરાય નમઃ । અતીન્દ્રિયદ્રષ્ટ્રે નમઃ । અગ્રાહ્યાય નમઃ ।
અશોકાય નમઃ । ૮૦૦

ૐ અતમસે નમઃ । દૃઢાય નમઃ । અચિન્ત્યવેગાય નમઃ ।
અધિષ્ઠાનસ્થિતાય નમઃ । અધોક્ષજાય નમઃ । આશ્રમાય નમઃ ।
કૃતે લોકહિતેઽતૃપ્તાય નમઃ । અનન્તરૂપાય નમઃ । ઉદીરણાય નમઃ ।
અનિરોધ્યાય નમઃ । અપ્રમેયાત્મને નમઃ । વાદેઽતિરથાય નમઃ । ઉગ્રધિયે નમઃ ।
અનુકૂલાય નમઃ । અરવિન્દાક્ષાય નમઃ । અમેયશ્રિયે નમઃ ।
ધરણીશયાય નમઃ । અમાનિને નમઃ । માનદાય નમઃ । માન્યાય નમઃ । ૮૨૦

ૐ મિતાશિને નમઃ । મિતભાષણાય નમઃ । કરણીયાદનાવૃત્તાય નમઃ ।
અક્ષોભ્યાય નમઃ । આનન્દભાવનાય નમઃ । ઉદારચિન્તાય નમઃ ।
નિઃસ્વાર્થાય નમઃ । ઊર્જાવતે નમઃ । સ્વત ઊર્જિતાય નમઃ ।
કપીન્દ્રભક્તાય નમઃ । ગરુડવાહનારાયણાર્ચકાય નમઃ ।
કવિહૃદ્યકથાવક્ત્રે નમઃ । અકામાય નમઃ । સ્વયં ગુરુતમાય નમઃ ।
ગોવિન્દાષ્ટકગાયિને નમઃ । સુકૃતાશિષે નમઃ । ગાતૃમધ્યગાય નમઃ ।
ભજગોવિન્દગાનેન તુચ્છરાગવ્યપોહનાય નમઃ । ગુરુપાદેષુ કૃતજ્ઞાય નમઃ ।
સ્વતઃ સ્વકૃતૌ કૃતધિયે નમઃ । ૮૪૦

ૐ બાલાદપિ શ્રુતનયાય નમઃ । ચતુરશ્રાય નમઃ । શુચિશ્રવસે નમઃ ।
સ્વામિને નમઃ । શક્તિમતાં શ્રેષ્ઠાય નમઃ । ચતુર્વેદવિદર્હણાય નમઃ ।
સ્વાન્તર્ગતારિનિવહનિયન્ત્રે નમઃ । અબાહ્યશત્રુકાય નમઃ ।
ગોક્ષીરચન્દનક્ષોદઘૃતાદ્યૈરીશસેચકાય નમઃ ।
શબ્દાતિગબ્રહ્મરતાય નમઃ । શબ્દબ્રહ્મણિ નિષ્ઠિતાય નમઃ ।
અક્ષુબ્ધચેતસે નમઃ । અક્રુદ્ધાય નમઃ । સ્વશાસ્ત્રે નમઃ ।
શિષ્યશાસકાય નમઃ । ઇષ્ટાય નમઃ । અવિશિષ્ટાય નમઃ । શિષ્ટેષ્ટાય નમઃ ।
શુભાઙ્ગાય નમઃ । શુભદેક્ષણાય નમઃ । ૮૬૦

ૐ શિવાર્પિતમનસે નમઃ । શ્રીશસેવિને નમઃ । શ્રેયોદસૂક્તિમતે નમઃ ।
દાન્તાય નમઃ । દમયિત્રે નમઃ । અદમ્યાય નમઃ ।
તીર્ણશ્રુત્યાદિસાગરાય નમઃ । સિદ્ધાર્થાય નમઃ । સિદ્ધસઙ્કલ્પાય નમઃ ।
સુતપસે નમઃ । શુભદર્શનાય નમઃ । આશ્રિતાવનનિષ્ણાત
સુપ્રસાદાય નમઃ । સુલોચનાય નમઃ । સુમુખાય નમઃ । સુરુચયે નમઃ ।
સેવાઽઽયાતાર્થિસુલભાય નમઃ । સુદૃશે નમઃ ।
સોમયાગાદિવિપ્રેન્દ્રનિર્વર્ત્ય ક્રતુરક્ષકાય નમઃ । સ્તવ્યાય નમઃ ।
સ્તવપ્રિયાય નમઃ । ૮૮૦

ૐ સ્તોત્રાય નમઃ । સ્તુતયે નમઃ । સ્તોત્રે નમઃ ।
સ્તુતાતિગાય નમઃ । સ્થવિરાય નમઃ । દણ્ડધૃતે નમઃ ।
દણ્ડાપનીતાશ્રિતરુક્ષ્યયાય નમઃ । સ્થિરાય નમઃ । સ્પષ્ટાક્ષરાય નમઃ ।
બિલ્વતુલસીસ્રગ્વિભૂષિતાય નમઃ । સ્વસ્તિકૃતે નમઃ ।
સ્વવશાય નમઃ । સ્વઙ્ગાય નમઃ । સ્વભાવમૃદવે નમઃ ।
અક્ષિતાય નમઃ । હવનપ્રીતહુતભુઙ્મધ્યગેશ્વરદર્શનાય નમઃ ।
અનુગ્રહક્ષમાય નમઃ । ક્ષામદ્રષ્ટ્રે નમઃ । ક્ષેમકૃદીક્ષણાય નમઃ ।
ક્ષેત્રક્ષેત્રજ્ઞદૃષ્ટ્યાપ્તસમદૃષ્ટયે નમઃ । ૯૦૦

ૐ હિતઙ્કરાય નમઃ । મહનીયગુણગ્રામાય નમઃ ।
જયેન્દ્રન્યસ્તપીઠધુરે નમઃ । સ્વહંસગમનવ્યાપ્તભારતાય નમઃ ।
વિબુધાકૃતયે નમઃ । કદન્નતૃપ્તાય નમઃ । ક્ષામોદરાય નમઃ ।
મુગ્ધતરાનનાય નમઃ । મહાધ્વગમનાશ્રાન્તાય નમઃ ।
મહાપાશુપતાકૃતયે નમઃ । સામગાનપ્રિયાય નમઃ ।
સામગાનતોષિતશઙ્કરાય નમઃ । મહામન્ત્રજપપ્રાપ્તવિભૂતયે નમઃ ।
નૃણાં ભૂતિદાય નમઃ । સુધાધરીકૃતિચણસૂક્તયે નમઃ ।
સ્વીકૃતસંયમાય નમઃ । વૃત્તૌ મધુકરાય નમઃ । ચિત્તે હિમાય નમઃ ।
ધિયા વાગીશ્વરાય નમઃ । સુવાસિન્યર્ચનરતાય નમઃ । ૯૨૦

ૐ નવકન્યાસમર્ચકાય નમઃ । સુવાસિનીમણ્ડલગદેવી દર્શનનિર્વૃતાય નમઃ ।
અજપાજપસુપ્રીતાય નમઃ । કામાક્ષીપ્રકટાકૃતયે નમઃ ।
દેવ્યૈ નવનવસ્નિગ્ધ મધુરાન્નનિવેદકાય નમઃ । અગ્રજાગ્રાય નમઃ ।
અચિન્ત્યગુણાય નમઃ । અગર્વિતાય નમઃ । અમરવાગ્વદાય નમઃ ।
વૈદિકૈસ્તાન્ત્રિકૈર્મન્ત્રૈઃ અર્હિતામ્બાય નમઃ । અતાન્ત્રિકાય નમઃ ।
અનાકલિતસાદૃશ્યાય નમઃ । શ્રીવિદ્યામન્ત્રતન્ત્રવિદે નમઃ ।

સર્વાધિશાયિકરુણાય નમઃ । સ્મિતરોચિષા લલિતાય નમઃ ।
અદ્વૈતં સત્યમિત્યાખ્યન્મધ્યાર્જુનશિવાર્ચકાય નમઃ ।
ત્ર્યાશ્રમસ્થૈરર્હિતાઙ્ઘ્રયે નમઃ । પ્રત્યઙ્ચિતિવિમર્શકાય નમઃ ।
દયમાનાય નમઃ । દીર્ઘદૃષ્ટયે નમઃ । ૯૪૦

ૐ ગુરુસઙ્કેતપાલકાય નમઃ । નિજસંલાપમાધુર્યહૃતસજ્જનમાનસાય નમઃ ।
ઉપચારૈઃ ષોડશભિર્માનસૈર્મહિતેશ્વરાય નમઃ ।
આબાલગોપવિદિતાય નમઃ । કર્માકર્મવિભાગવિદે નમઃ ।
સ્વાશ્રિતાનાં લુપ્તવિઘ્નાય નમઃ । ઋજુચિત્તસમીપગાય નમઃ ।
દૈવીસમ્પદ્ધૃતાકારાય નમઃ । દૈવીસમ્પન્નિધાનભુવે નમઃ ।
અમ્બાપાદાવલમ્બિસ્વજીવનાય નમઃ । સુખજીવનાય નમઃ । મૌનિને નમઃ ।
અચેષ્ટાય નમઃ । અવચનપ્રવક્ત્રે નમઃ । શ્રોતૃતર્પકાય નમઃ ।
જરાશોષિતસર્વાઙ્ગાય નમઃ । જરયા અજરિતાન્તરાય નમઃ ।
વાચાઽપનીતવૈમત્યાય નમઃ । શાસ્ત્રરક્ષણ તત્પરાય નમઃ । ગુરુવારે
શાસ્રવિદ્ભિઃકૃતશાસ્ત્રવિચારણાય નમઃ । ૯૬૦

ૐ સ્વજન્મભાનુરાધાસુ વેદરક્ષાવિચારકૃતે નમઃ ।
અપ્રૌઢકન્યોદ્વાહાર્થનિધિદાય નમઃ । લોકનાયકાય નમઃ ।
અનાથપ્રેતસંસ્કારોપકૃન્નિધિવિધાયકાય નમઃ । વેદભાષ્યાધીતિપાલાય નમઃ ।
ક્ષુધિતાન્નવિતારકાય નમઃ । મુષ્ટિતણ્ડુલચિત્ત્યાત્ત
નિઃસ્વાલયસુપોષણાય નમઃ । રુગ્ણાલયગતાર્તાનાં ઈશાનુગ્રહવેદકાય નમઃ ।
કલવૈસ્થસ્વગુરુરાડ્વૃન્દાવન ચિરસ્થિતયે નમઃ ।
સતારાક્ષેત્રગોદીચ્ય ચિદમ્બરશિવાશ્રયાય નમઃ । દેહલીનિર્મિતાદ્યગ્ર્ય
સ્વામિશૈલેશ મન્દિરાય નમઃ । શરણાગતદીનાર્તપરિત્રાણપરાયણાય નમઃ ।
આમ્નાયસારગુલિકાચૂષકાય નમઃ । સ્વચ્છહૃચ્છયાય નમઃ ।
વિદિતાત્મરસાનન્દાસ્વાદત્યક્તૈષણાય નમઃ । સ્વભુવે નમઃ ।
સિંહાસનેશી-મનુરાડ્જપનિસ્તન્દ્રિતાન્તરાય નમઃ । આત્માનન્દરસાસ્વાદાર્ધ
સમ્મીલિતપક્ષ્મકાય નમઃ । પૂજાગેહાનન્તરભૂકૃતવાસાય નમઃ ।
અનિકેતનાય નમઃ । ૯૮૦

ૐ મહાગુરુમહાસ્વામિપરમાચાર્યસંજ્ઞકાય નમઃ । નવો
મહાનિતિખ્યાતશિષ્યાય નમઃ । શિષ્યોપનાયકાય નમઃ ।
દેશપાલૈરર્ચિતાઙ્ઘ્રયે નમઃ । કોટ્યતીતજનૈર્નુતાય
શ્રીજયેન્દ્રસરસ્વત્યૈ સ્વયમદ્વૈતબોધકાય નમઃ । શિષ્યાય

યોગલિઙ્ગાર્ચામાર્ગનિર્દેશકારકાય નમઃ । સુન્દરીવરિવસ્યાર્હ
શ્રીવિદ્યાદીક્ષિતાશ્રવાય નમઃ । બાલસ્વામીતિ સંજ્ઞયા
પ્રખ્યાપિતપ્રશિષ્યાય નમઃ । સ્વસન્નિધૌ પ્રશિષ્યાય બોધિતાદ્વૈતાય નમઃ ।
આશુકૃતે નમઃ । શિષ્યપ્રશિષ્યનિર્વૃત્તશતાબ્દીપરમોત્સવાય નમઃ ।
વેદૈશ્ચતુર્ભિર્વિપ્રૌઘઘોષિતૈર્મુદિતાન્તરાય નમઃ ।
પાદપીઠે ન્યસ્તપાદાય નમઃ । હેમસિંહાસનાસ્થિતાય નમઃ ।
ગુરુદ્વિતયશિષ્યાગ્ર્યકૃતચામરવીજનાય નમઃ ।
શિષ્યૈર્જયેન્દ્રૈઃ કનકમુદ્રાકૃતપદાર્ચનાય નમઃ ।
નાનાશાસ્ત્રસુનિષ્ણાતવિદ્વજ્જનપરીવૃતાય નમઃ । વૃન્દાવને
સન્નિહિતાય નમઃ । કાઞ્ચ્યન્તરિતવિગ્રહાય નમઃ । ૧૦૦૦

ૐ સ્વર્ચ્યાય નમઃ । સ્તવેડ્યાય નમઃ । સ્તુત્યાત્મને નમઃ ।
પુરઃસ્ફુરિતભાતનવે નમઃ । નાદ્યાસ્તીતિ ભ્રાન્તિભીતસ્વાન્તેઽસ્મીતિ
પ્રદર્શકાય નમઃ । કાઞ્ચ્યાં શ્રીકામકોટ્યાખ્યપીઠગાય શઙ્કરાય
ગુરવે નમઃ । પૂજ્યશ્રીચરણાય ચન્દ્રશેખરેન્દ્રસરસ્વત્યૈ નમઃ ।
શારદામઠસુસ્થિતાય મહાસ્વામિને નમઃ । ૧૦૦૮

નમસ્તે પરમાચાર્ય મહાસ્વામિન્ મહાગુરો ।
વૃન્દાવને સન્નિહિત રક્ષ વૃન્દમિમં સ્વકમ્ ॥

નામસ્તવનમાત્રેણપુરઃ સ્ફુરિતવિગ્રહઃ ।
દર્શયત્યાત્મચરિતં મોદયન્નઃ પરોગુરુઃ ॥

ઇમં સ્તવમધીયાનઃ શ્રદ્ધાભક્તિસમન્વિતઃ ।
આપ્નોતિ સમ્પદં સર્વામિષ્ટામર્થ્યાં શુભેક્ષણઃ ॥

શ્રીચન્દ્રશેખરેન્દ્રસરસ્વતી સહસ્રનામાવલિઃ સમાપ્તા ।

Proofread by Aruna Narayanan

*Shri Chandrashekharendrasarasvati Sahasranamavali*

pdf was typeset on June 28, 2023

Please send corrections to *sanskrit@cheerful.com*